१०८ स्वात्मानन्दं स्वयं भोक्ता स जीवन्मुक्त उच्यते । स्वयमेवैकवीरोऽग्रे स्वयमेव प्रभुः स्मृ- ९०
१२१ तः । स्वस्वरूपे स्वयं स्वप्स्यन् स जीवन्मुक्त उच्यते ॥ २२ ॥ ब्रह्मभूतः प्रशान्तात्मा
ब्रह्मानन्दमयः सुखी । स्वच्छरूपो महामौनी वैदेही मुक्त एव सः ॥ २३ ॥ सर्वात्मा
समरूपात्मा शुद्धात्मा त्वहमुत्थितः । एकवर्जित एकात्मा सर्वात्मा स्वात्ममात्रकः ॥ २४ ॥
अजात्मा चामृतात्माहं स्वयमात्माहमव्ययः । लक्ष्यात्मा ललितात्माहं तूष्णीमात्मस्व-
भाववान् ॥ २५ ॥ आनन्दात्मा प्रियो ह्यात्मा मोक्षात्मा बन्धवर्जितः । ब्रह्मैवाहं
चिदेवाहमेवं वापि न चिन्त्यते ॥ २६ ॥ चिन्मात्रेणैव यस्तिष्ठेद्वैदेही मुक्त एव
सः ॥ २७ ॥ निश्चयं च परित्यज्य अहं ब्रह्मेति निश्चयम् । आनन्दभरितस्वान्तो वैदे-
ही मुक्त एव सः ॥ २८ ॥ सर्वमस्तीति नास्तीति निश्चयं त्यज्य तिष्ठति । अहं ब्रह्मा- १२५

स्मि नास्मीति सच्चिदानन्दमात्रकः ॥ २९ ॥ किंचित्क्वचित्कदाचिच्च आत्मानं न स्पृश-
त्यसौ । तूष्णीमेव स्थितस्तूष्णीं तूष्णीं सत्यं न किंचन ॥ ३० ॥ परमात्मा गुणा-
तीतः सर्वात्मा भूतभावनः । कालभेदं वस्तुभेदं देशभेदं स्वभेदकम् ॥ ३१ ॥ किंचि-
द्भेदं न तस्यास्ति किंचिद्वापि न विद्यते । अहं त्वं तदिदं सोऽयं कालात्मा कालही-
नकः ॥ ३२ ॥ शून्यात्मा सूक्ष्मरूपात्मा विश्वात्मा विश्वहीनकः । देवात्मा देवहीनात्मा
मेयात्मा मेयवर्जितः ॥ ३३ ॥ सर्वत्र जडहीनात्मा सर्वेषामन्तरात्मकः । सर्वसंकल्पहीनात्मा
चिन्मात्रोऽस्मीति सर्वदा ॥ ३४ ॥ केवलः परमात्माहं केवलो ज्ञानविग्रहः । सत्तामा-
त्रस्वरूपात्मा नान्यत्किंचिज्जगद्भयम् ॥ ३५ ॥ जीवेश्वरेति वाक्क्वेति वेदशास्त्राद्यहं
त्विति । इदं चैतन्यमेवेति अहं चैतन्यमित्यपि ॥ ३६ ॥ इति निश्चयशून्यो यो वैदे-

नाशिते जगत् ॥ ७७ ॥ विन्ध्याटव्यां पायसान्नमस्ति चेज्जगदुद्भवः । रम्भास्तम्भेन ४०
ग्रो० काष्ठेन पाकसिद्धिर्जगद्भवेत् ॥ ७८ ॥ सद्यः कुमारिकारूपैः पाके सिद्धे जगद्भवेत् ।
११५॥ चित्रस्थदीपैस्तमसो नाशश्चेदस्त्विदं जगत् ॥ ७९ ॥ मासात्पूर्वं मृतो मर्त्यो ह्यागतश्चे-
ज्जगद्भवेत् । नक्रं क्षीरस्वरूपं चेत्कांचिकमिदं जगद्भवेत् ॥ ८० ॥ गोस्तनादुद्भवं क्षीरं
पुनरारोपणं जगत् । शूरजोऽब्धौ समुत्पन्ने जगद्भवतु सर्वदा ॥ ८१ ॥ कूर्मरोम्णा गजे
बन्धे जगदस्तु तदोत्कटे । नालस्थतन्तुना मेरुश्चालितश्चेज्जगद्भवेत् ॥ ८२ ॥ तरङ्ग-
मालया सिन्धुर्बद्धश्चेदस्त्विदं जगत् । अम्भसश्चेज्ज्वलनं जगद्भवतु सर्वदा ॥ ८३ ॥
ज्वालाभिः शीतलश्चेदस्ति सत्यमिदं जगत् । ज्वालामिमन्डले [illegible] जगदस्त्वि-
[illegible] ॥ ८४ ॥ [illegible] जगत् । [illegible] स्थित- ॥११६॥

श्चेदस्त्विदं जगत् ॥ ८५ ॥ निगिरश्चेद्वृन्दसूनुर्भेकश्चास्त्वदस्त्विदम् । मशकेन हते सिंहे
जगत्सत्यं तदास्तु ते ॥ ८६ ॥ अणुकोटरविस्तीर्णे त्रैलोक्यं चेज्जगद्भवेत् । तृणानलश्च
नित्यश्चेत् क्षणिकं चेज्जगद्भवेत् ॥ ८७ ॥ स्वप्नदृष्टं च यद्वस्तु जागरे चेद्भुजगद्भवः ।
नदीवेगो निश्चलश्चेत्केनापीदं भवेज्जगत् ॥ ८८ ॥ क्षुधितस्याग्निर्भैक्ष्यश्चेन्निमिषं कल्पितं
भवेत् । जात्यन्धे रत्नविषयः सुखाभश्चेज्जगत्तदा ॥ ८९ ॥ नपुंसककुमारस्य स्त्रीसुखं
चेद्भवेज्जगत् । निर्मितः शशशृङ्गेण रथश्चेज्जगदस्ति तत् ॥ ९० ॥ सद्योजाता तु या कन्या
भोगयोग्या भवेज्जगत् । वन्ध्या गर्भावाप्तसौख्यं ज्ञाता चेदस्त्विदं जगत् ॥ ९१ ॥ काको
वा हंसवद्गच्छेज्जगद्भवतु निश्चलम् । महाखरो वा सिंहेन युध्यते चेज्जगत्स्थितिः ॥ ९२ ॥
महाखरो गजगतिं गतश्चेज्जगदस्तु तत् । संपूर्णचन्द्रसूर्यश्चेज्जायतां [illegible] जगत् ॥ ९३ ॥

॥ ७ ॥ भस्मव्यापाण्डराङ्गश्शशिशकलधरो ज्ञानमुद्राक्षमालावीणा पुस्तैर्विराजत्करकम-
लधरो ( करतलकमलो ) योगपट्टाभिरामः । व्याख्यापीठे निषण्णो मुनिवरनिकरै स्सेव्य-
मानः प्रसन्नः ( सेवितस्सुप्रसन्नः ) सव्यालः ( डः ) कृत्तिवासास्सततमवतु नो
दक्षिणामूर्तिरीशः ॥ ८ ॥ मन्त्रेण न्यासः । ( ब्रह्मर्षिन्यासः ) । तारं पराँ ( मायं )
रमाबीजं वदेत् ( पदं ) साम्बशिवाय च । तुभ्यं चानलजायां च मनुर्द्वादशवर्णकः
॥९॥ वीणां करैः पुस्तक मक्षमालां विभ्राण मभ्राभगलं वराढ्यम् । फणीन्द्रकक्ष्यं मुनि-
भिश्शुकाद्यै स्सेव्यं वटाधःकृतनीड मीडे ॥ १० ॥ विष्णूऋषि रनुष्टुप्छन्दः । देवतादः-
क्षिणास्यः । मन्त्रेण न्यासः । तारं नमो भगवते तुभ्यं वटपदं ततः । मूलेति पदमुच्चार्य
वासिने पदमुद्धरेत् ॥ ११ ॥ प्रज्ञामेधापदंपश्चादादिसिद्धिंततोवदेत् । दायिनेपदमुच्चार्य- ॥४६४

मायिनेनमउद्धरेत् ॥ १२ ॥ ( वागीशाय ततः पश्चान्महाज्ञानपदं ततः ) ( वन्हिजायां
ततस्त्वेष द्वात्रिंशद्वर्णकोमनुः ) आनुष्टुभोमन्त्रराज स्सर्वमन्त्रोत्तमोत्तमः ॥ १३ ॥
ध्यानम् । मुद्रापुस्तकवन्हिनागविलसद्बाहुं प्रसन्नाननं मुक्ताहारविभूषणँ शशिकलाभा-
स्वत्किरीटोज्वलम् । अज्ञानापह मादि मादिमगिरामर्थं भवानीपतिं न्यग्रोधान्तनिवा-
सिनँ पर ( सुर ) गुरुं ध्यायाम्यभीष्टाप्तये ॥ १४ ॥ ( मौनमुद्रा ) सोऽहमिति यावदा-
स्थितिः सा निष्ठा भवति । तदभेदेनमन्त्राम्रेडनं ज्ञानसाधनम् । चित्ते तदेकतानता
परिकरः । अङ्गचेष्टार्पणं बलिः । त्रीणि धामानि कालः । द्वादशान्तपदँ स्थानमिति ।
ते ह पुनश्श्रद्दधानास्तं प्रत्यूचुः । कथंवाऽस्योदयः । किं स्वरूपम । कोवाऽस्योपा-
सक इति । स होवाच । वैराग्यतैलसम्पूर्णे भक्तिवर्तिसमन्विते । प्रबोधपूर्णपात्रे तु

